[७१०] आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसङ्ख्यानम् । (म. भा. ३.१३२)

'दिवोदासं वध्र्यश्वाय दाशुषे' (ऋ. ६.६१.१) ॥

## अन्तः । (९२/३८२६)

अन्तः इत्यधिकृतम्[1] । इत उत्तरं यद्वक्ष्यामस्तत्र पूर्वपदस्यान्तः उदात्तो भवति इत्येवं[2] वेदितव्यम् । वक्ष्यति – 'सर्वं गुणकार्त्स्न्ये' (६.२.९३/३८२७) । सर्वश्वेतः । सर्वकृष्णः[3] । [4]प्राक् 'उत्तरपदादिः' (६.२.१११/२८४५) इत्येतस्मादयमधिकारो वेदितव्यः ॥

## सर्वं गुणकार्त्स्न्ये । (९३/३८२७)

सर्वशब्दः पूर्वपदं गुणकार्त्स्न्ये वर्तमानमन्तोदात्तं भवति । सर्वश्वेतः । सर्वकृष्णः । सर्वमहान् । सर्वम् इति किम् ? परमश्वेतः । [5]आश्रयव्याप्त्या परमत्वं [6]श्वेतत्वस्य इति गुणकार्त्स्न्यं वर्तते । गुणग्रहणं किम् ? सर्वसौवर्णः । सर्वराजतः । कार्त्स्न्ये इति किम् ? सर्वेषां श्वेततरः सर्वश्वेतः । 'गुणात्तरेण समासस्तरलोपश्च वक्तव्यः' (वा. ८८) इत्येवमत्र समासस्तरलोपश्च ॥

## सञ्ज्ञायां गिरिनिकाययोः । (९४/३८२८)

सञ्ज्ञायां विषये गिरि निकाय इत्येतयोः [7]उत्तरपदयोः पूर्वपदमन्तोदात्तं भवति । अञ्जनागिरिः । भञ्जनागिरिः । निकाये – शापिण्डिनिकायः । [8]मौण्डिनिकायः । [9]चिखिल्लिनिकायः । सञ्ज्ञायाम् इति किम् ? परमगिरिः । ब्राह्मणनिकायः ॥

## कुमार्यां वयसि । (९५/३८२९)

[10]कुमार्यामुत्तरपदे वयसि गम्यमाने पूर्वपदमन्तोदात्तं भवति । वृद्धकुमारी । जरत्कुमारी । कुमारीशब्दः पुंसा [11]सहासंप्रयोगमात्रं प्रवृत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिर्वयो[12]विशेषवचनैः समानाधिकरणो भवति । तच्च वयः इह गृह्यते, न [13]कुमारत्वमेव । वयसि इति किम् ? परमकुमारी ॥

## उदकेऽकेवले । (९६/३८३०)

अकेवलं मिश्रम् । तद्वाचिनि समासे उदकशब्दे उत्तरपदे पूर्वपदमन्तोदात्तं भवति । गुडमिश्रमुदकम् [14]गुडोदकम्, गुडोदकम् । [15]तिलोदकम्, तिलोदकम् । स्वरे कृते एकादेशः 'स्वरितो वानुदात्ते पदादौ' (८.२.६/३६५९) इति पक्षे स्वरितो [16]भवति । अकेवले इति किम् ? [17]शीतोदकम् । उष्णोदकम् ॥

---

1. वेदितव्यम् इत्यधिकम् फ. 2. तद् इत्यधिकम क. ह. 3. सर्वमहान् इत्यधिकम् फ. 4. प्रागुत्तरपदात् इत्येव ह. 5. आश्रयव्यापारत्वं ह. 6. श्वेतत्वस्य नास्ति फ. 7. उपपदयोः फ. 8. गुडिनिकायः ब, गौडिनिकायः क. ड, नास्ति ग. 9. उदाहरणमिदं नास्ति ग, चिक्कलिनिकायः ब, चखल्लिनिकायः ह. 10. कुमारीशब्दे ह. 11. संप्रयोगमात्रं प्रवृत्तमुपादानं भवति क. ह. 12. विशेषवचने क. 13. कुमारीत्वम् ह. 14. गुडोदकम् नास्ति फ. 15. वपुलोदकम् ब. क. फ. 16. भवति नास्ति फ. 17. शीतोदकम् नास्ति ह.